RKMVU/Int MA/San/11-16/D2013/SK-101

# **SK-101 - कठोपनिषद्याज्ञवल्क्यस्मृतौ**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

==========================================

**A) षट्सु चतुर्णां रिक्तस्थानं पूरयत। 1x4=4**

1) शान्तसङ्कल्पः.....वरं वृणे।
2) दूरमेते.........ज्ञाता।
3) हन्ता चेत्.........न हन्यते।
4) आत्मानं रथिनं......च।
5) अशब्दमस्पर्शं........उच्यते।
6) न प्राणेन.........उपाश्रितौ।

**B) अष्टसु षण्णाम् उत्तराणि लिखत। 1x6=6**

1) कठोपनिषदि कति अध्यायाः कति वा वल्ल्यः सन्ति।
2) श्रद्धा नाम का।
3) यमप्रदत्तेषु द्वितीयो वरः कः।
4) श्वोभावाः - कोऽर्थः।
5) यमेन कोऽग्निश्चितः।
6) स तु तत्पदमाप्नोति, कीदृशं पदम्।
7) ऊर्ध्वं प्राणमुन्नयति, कस्मात्।
8) तदेतदिति मन्यन्ते - के।

**C) सप्तसु यथेच्छं पञ्चानां भाष्यदिशा ससन्दर्भं तात्पर्यं स्पष्टीकुरुत। 3x5=15**

1) सस्यमिव मर्त्यः पच्यते।
2) त्रिभिरेत्य सन्धिम् ...
3) पुनः पुनर्वशमापद्यते मे।
4) नायं हन्ति न हन्यते।
5) दृश्यते त्वग्र्यया बुद्ध्या।

6) पराञ्चि खानि व्यतृणत् ...

7) तेषां शान्तिः नेतरेषाम्।

**D) पञ्चसु यथेच्छं त्रयाणां भाष्यदिशा लघुटिप्पणीं लिखत।** **5x3=15**

1) विचिकित्सा

2) विद्याविद्ये

3) धीरः

4) समनस्कः

5) अङ्गुष्ठमात्रः पुरुषः

**E) शाङ्करभाष्यदिशा द्वयोरेकं समाधत्त।** **10x1=10**

1) उपनिषच्छब्दस्यार्थं स्फुटीकुरुत।

2) रथरूपककल्पनां शाङ्करभाष्यदिशा वर्णयत।

***

RKMVU/Int MA/San/11-16/D2013/SK-102

## **SK-102 – केनमुण्डकोपनिषदौ**

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

### केनोपनिषद्

**A) द्वयोः यथेच्छम् एकस्य उत्तरं लिखत।।** **10x1=10**

1) प्रतिबोधविदितं मतं – भाष्यदिशा व्याख्येयम्।

2) यक्षरूपाख्यायिकायाः सारः कः?

**B) द्वयोः यथेच्छम् एकस्य उत्तरं लिखत।।** **5x1=5**

1) उपोद्धातभाष्यमधिकृत्य ज्ञानकर्मसमुच्चयं खण्डयत।

2) अथाध्यात्मं..... – विस्तरेण लिखत।

**C) सप्तसु यथेच्छं पञ्च प्रश्नाः समाधेयाः।** **1x5=5**

1) ऐषणा त्रयं किम्?

2) प्रेषितशब्दस्य अर्थविशेषः कः?

3) इष् धातुः केष्वर्थेषु प्रयुज्यते ?

4) अमृतत्त्वं कीदृशात्मज्ञानेन प्राप्यते ?

5) अनभ्युदितं – पदस्यास्य कोऽर्थः ?

6) केऽन्यान् देवान् अतिशेरते ?

7) ब्रह्मप्राप्त्युपायाः के ?

**D) सप्तसु पञ्चानां रिक्तस्थानं पूरयत।** **1x5=5**

1) यद्वाचा ...

2) यदि मन्यसे ...

3) प्रतिबोधविदितम् ...

4) केनेषितं पतति ...

5) यन्मनसा न ...

6) उपनिषदं भो ब्रूहि ...

7) यो वा एतामेवं ...

## मुण्डकोपनिषद्

**E) त्रिषु एकस्य यथेच्छम् उत्तरं लिखत।** **5x1=5**

1) विद्यायामधिकारः कस्य। परीक्ष्य लोकानित्यादिना समर्थयत।

2) अन्धेनैव नीयमाना यथान्धाः – ससन्दर्भं प्रपञ्चयत।

3) कथं धीराः आत्मानं परिपश्यन्ति।

**F) षट्सु चतुर्णां यथेच्छम् उत्तरं लिखत।।** **2.5x4=10**

1) भिद्यते हृदयग्रन्थिः इति वर्णयत।

2) अक्षरात्सृष्टिरित्यत्र दृष्टान्ताः के।

3) अग्निजिह्वाः काः।

4) कर्मणोऽवरत्वं किमर्थमुच्यते।

5) परमं साम्यमुपैति – कः इति निरूपयत।

6) आत्मा केन न लभ्यः केन च लभ्यते इति स्पष्टयत।

**G) यथेच्छं सप्तसु पञ्चानामुत्तरं लिखत।** **1x5=5**

1) ब्रह्मविद्यायाः आदिगुरुः कः।

2) महाशालपदस्य कोऽर्थः।

3) कथं विद्याद्वयं विभज्यते।

4) कर्माणि कुत्र सन्ततानि।

5) तृतीयमुण्डकस्यारम्भः कुतः?

6) कोऽतिवादी न भवति?

7) परमं तपः किम्?

**H) यथेच्छं सप्तसु पञ्चानामुत्तरं लिखत।** **1x5=5**

1) ब्रह्मा देवानाम् ...

2) यथोर्णनाभिः सृजते ...

3) परीक्ष्य लोकान् कर्मचितान् ...

4) पुरुष एवेदं विश्वम् ...

5) प्रणवो धनुः ...

6) द्वा सुपर्णा ...

7) नायमात्मा प्रवचनेन ...

***

RKMVU/Int MA/San/10-15 & 12-14/D2013/SK-125

**SK-125 - भगवद्गीता सभाष्या 2,3,15 अध्यायाः**

कालावधिः - होराद्वयम् | पूर्णाङ्काः - 50

==========================================

**A) सप्तसु पञ्चानां रिक्तस्थानं पूरयत।** **1x5=5**

1) नैव धर्मी न चाधर्मी --- किञ्चिदचिन्तयन्।
2) शास्त्रं तु अन्त्यं --- अज्ञातार्थज्ञापकत्वेन।
3) कर्मण्येवाधिकारस्ते --- सङ्गोऽस्त्वकर्मणि।
4) संसारमेव निःसारं --- वैराग्यमाश्रिताः।
5) न हि कश्चित् --- प्रकृतिजैर्गुणैः।
6) निर्मानमोहाः जितसङ्गदोषाः --- पदमव्ययं तत्।
7) उत्तमः पुरुषस्त्वन्यः --- ईश्वरः।

**B) यथेच्छं सप्तसु पञ्च प्रश्नान् समाधत्त।** **1x5=5**

1) सप्तद्वीपा च मेदिनी - के सप्तद्वीपाः?
2) सद्बुद्धिः का।
3) को नाम भगवान्?
4) केन प्रयुक्तः पापं चरति पुरुषः?
5) जनकादयः इत्यत्रादिपदेन के ग्राह्याः।
6) छन्दांसि यस्य पर्णानि - छन्दश्शब्दस्यात्र कः अर्थः?
7) किमूर्ध्वमुच्यते।

**C) अभीष्टान् सप्तसु पञ्च प्रश्नान् समाधत्त।** **3x5=15**

1) ब्राह्मणत्वस्य हि रक्षणेन रक्षितः स्यात् वैदिको धर्मः। इति व्याख्यात।
2) प्रमातृत्वं हि आत्मनः निवर्तयति अन्त्यं प्रमाणम्। इति व्याख्यात।
3) अविद्वान् अज्ञः कथं कर्मसु सज्जते इति व्याख्यात।
4) ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः। इति व्याख्यात।
5) लोकसंग्रहं कः कथं कर्तुमर्हतीति व्याख्यात।

6) द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। इति व्याख्यात।

7) विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः। इति व्याख्यात।

**D) अभीष्टान् पञ्चसु प्रश्नत्रये निबन्धं लिखत।** **5x3=15**

1) संसारबीजभूतौ शोकमोहौ।

2) योगः कर्मसु कौशलम्।

3) लोकेऽस्मिन्द्विविधा निष्ठा।

4) पञ्चदशाध्यायोक्ता भगवद्विभूतिः विशद्यताम्।

5) इन्द्रियस्येन्द्रियस्यार्थे इत्यादिश्लोकं प्रपूर्य व्याख्यात।

**E) द्वयोः अभीष्टमेकं प्रश्नोत्तरं प्रपञ्चयत।** **10x1=10**

1) तृतीयाध्यायदिशा ज्ञानकर्मसमुच्चयं विशदयत।

2) स्थितप्रज्ञस्य लक्षणं व्याख्यात।

***

RKMVU/Int MA/San/10-15 & 12-14/D2013/SK-132

**SK-132 - ब्रह्मसूत्रम् 1.3,4**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

=======================================

**A) सप्तसु पञ्चानां रिक्तस्थानं पूरयत। 1x5=5**

1) यस्मिन् द्यौः___ अमृतस्यैष सेतुः।

2) कस्मिन्नु ___अस्थूलमनणु।

3) अथ यदिदमस्मिन् ___ विजिज्ञासितव्यम्।

4) धृतेश्च ___।

5) आनुमानिकमपि ___।

6) वदतीति___।

7) प्रकृतिश्च ___।

**B) त्रयोदशसु दशानां वाक्येन वाक्याभ्यां वा उत्तरत। 1x10=10**

1) द्युभ्वाद्यधिकरणे कति सूत्राणि सन्ति? एकमुदाहरत।

2) कम्पनाधिकरणस्य विषयवाक्यं किम्?

3) देवताधिकरणे कति सूत्राणि वर्तन्ते? एकमुदाहरत।

4) 'अपि च स्मर्यते' अर्थं वर्णयत।

5) भगवतः उपवर्षस्य मते शब्दो नाम कः?

6) का सेतुश्रुतिः नाम ?

7) वर्णा एव तु शब्दः इति कस्य मतम् ?

8) शूद्रस्य विद्यानधिकारे मुख्यं कारणं किम् ?

9) बुद्धेरात्मा महान् परः.... – कोऽर्थः ?

10) चतुर्विधभूतग्रामः कः ?

11) सृष्टिवाक्यानां समन्वयः कुत्र पर्यालोच्यते ?

12) जगद्वाचित्वात् – सूत्रार्थः कः ?

13) वाक्यान्वयाधिकरणस्य विषयवाक्यं लिखत ।

**C) यथाभिलाषं अष्टसु पञ्चानां सूत्राणाम् अर्थप्रकाशं कुरुत।** **2x5=10**

1) भूमा सम्प्रसादादध्युपदेशात्॥

2) गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गं च॥

3) ज्योतिर्दर्शनात्॥

4) ईक्षतिकर्मव्यपदेशात्सः॥

5) भावं तु बादरायणोऽस्ति हि॥

6) त्रयाणामेव चैवमुपन्यासः प्रश्नश्च॥

7) प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्॥

8) अवस्थितेरिति काशकृत्स्नः॥

**D) पञ्चसु त्रयाणामेव अधिकरणानां भाष्योक्तदिशा लघुटिप्पणीं कुरुत।** **5x3=15**

1) द्युभ्वाद्यधिकरणम्

2) देवताधिकरणम्

3) प्रमिताधिकरणम्

4) वाक्यान्वयाधिकरणम्

5) बालाक्यधिकरणम्

**E) द्वयोः एकस्य लघूपन्यासं कुरुत।** **10x1=10**

1) अपशूद्राधिकरणमधिकृत्य शूद्रस्य ब्रह्मविद्यायाम् अधिकारविषये सप्रमाणं प्रबन्धमारचयत।

2) प्रधानस्य अशब्दत्वं, महतः परमव्यक्तम् इत्यस्य काठकमन्त्रस्य च विवक्षितार्थम् आनुमानिकाधिकरणसाहाय्येन प्रपञ्चयत।

## **SK**-141 – भामती – चतुःसूत्री

कालावधिः – होराद्वयम्　　　　　　　　　　　　　　　　　　पूर्णाङ्काः – 50

========================================

**A) चतुर्दशसु दशानामुत्तरं लिखत ।**　　　　　　　　　　　　**1x10=10**

1) नहि जातु कश्चिदत्र सन्दिग्धे, कुत्र ?

2) श्रुतिस्मृतीतिहासपुराणेषु कीदृशमात्मतत्वं गीयते ?

3) पूर्वदौर्बल्यबोधकं पारमर्षं सूत्रं किम् ?

4) परत्र पूर्वदृष्टावभासः - अवभासपदस्यार्थः कः ?

5) तं केचिदन्यत्रान्यधर्माध्यास इति वदन्ति - के ते ?

6) एकस्यैवात्मनः बहुजीवभावसमर्थनाय शङ्कराचार्येण अध्यासस्य किमुदाहरणं दत्तम्?

7) प्रमातृत्वं नाम किम्?

8) स्वाध्यायानन्तर्यन्तु समानं कयोः ?

9) ऋणत्रयापाकरणे ब्रह्मज्ञानोपयोगं कर्मणामाहुः - किं तत्र प्रमाणम् ?

10) तत्त्वज्ञानोत्पादं प्रति आरादुपकारकत्वं केषाम् ?

11) अनधीत्य द्विजो वेदाननुत्पाद्य - इत्यादि प्रमाणं सिद्धान्ते कस्य निन्दार्थमुच्यते ?

12) शुद्धबुद्धयोरर्थः कः ?

13) भूतेऽपि वस्तुनि विकल्पो दृष्टः, कुत्र ?

14) शास्त्रयोनित्वेन ब्रह्मणः सर्वज्ञत्वे का व्याप्तिः प्रदर्शिता ?

**B) षट्सु यथेच्छं चतुर्णामुत्तरं लिखत।**　　　　　　　　　　　　**2.5x4=10**

1) पौर्वापर्ये पूर्वदोर्बल्यं प्रकृतिवत्, ससन्दर्भं तात्पर्यं प्रकाशयत।

2) अख्यातिवादमतं संगृह्य लिखत।

3) पीतः शङ्खः इत्यादिप्रत्यक्षं कथं भवतीति भामतीदृशा व्याख्यात।

4) ब्रह्मावगतेः अपुरुषार्थत्वमाशङ्क्य खण्डयत ।

5) पुरुषतन्त्रवस्तुतन्त्रयोः भेदः कः ?

6) शास्त्रस्यानेकविद्यास्थानोपबृंहितत्त्वं कथम् ?

**C) चतुर्षु द्वयोः भामत्युक्तरीत्या ससन्दर्भं तात्पर्यं प्रकाशयत । 5x2=10**

1) यत्र यदध्यासस्तद्विवेकाग्रहनिबन्धनो भ्रमः।

2) संविदः अपराधीनप्रकाशत्वं व्याख्यात।

3) साधनचतुष्टयम्।

4) अन्येषामपि भावविकाराणां त्रिष्वेवान्तर्भावः।

**D) त्रिषु द्वयोः ग्रन्थोक्तदिशा लघुप्रबन्धं कुरुत । 10x2=20**

1) इतरेषां अध्यासलक्षणान्युक्त्वा स्वमततात्पर्यप्रकाशनपूर्वकं खण्डयत।

2) अथशब्दार्थं पूर्वपक्षोपस्थापनपूर्वकं विचार्य स्वमतं व्यवस्थापयत ।

3) शास्त्रयोनित्वादिति सूत्रं व्याख्यात।

***

RKMVU/Int MA/San/11-16/D2013/SK-151

## **SK**-151 – पञ्चदशी (1-5 अध्यायाः)

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

==========================================

**A) सप्तसु यथेच्छं पञ्चानां प्रतीकसूचितानां श्लोकानां पूर्तिः विधेया। 1x5=5**

1) सुप्तोत्थितस्य सौषुप्त ---
2) द्विधा विधाय चैकैकं ---
3) ध्यातृध्याने परित्यज्य ---
4) सदद्वैतं श्रुतं यत्तत् ---
5) एषा ब्राह्मी स्थितिः ---
6) देहादाभ्यन्तरः प्राणः ---
7) ईश्वरेणापि जीवेन ---

**B) द्वादशसु दशानां प्रश्नानां लघूत्तराणि लिखत। 1x10=10**

1) जाग्रदवस्थायाः लक्षणं किम्?
2) इयमात्मा परानन्दः इत्यत्र इदंशब्दाभिधेयं किम्?
3) श्रुत्यन्तेषु किमुपदिश्यते?
4) मायाविद्ययोः कः भेदः?
5) सूक्ष्मशरीरस्य कति अवयवाः?
6) कर्मेन्द्रियाणि कानि? तदुत्पत्तिः कुतः?
7) समष्टिलिङ्गशरीराभिमानी कः?
8) व्यष्टिस्थूलशरीराभिमानी कः?
9) तत्त्वमसीत्यत्र तत्पदेन कीदृशं ब्रह्म पञ्चदशीकृता अभिहितम्?
10) तत्त्वमसि इति वाक्ये त्वंपदेन किमुच्यते?
11) कः जीवो नाम?
12) वेदान्तादपि प्रबलं मानं किम्?

**C) सप्तसु यथेच्छं पञ्चानाम् उत्तराणि लिखत।** **3x5=15**

1) अवस्थात्रयं विवृणुत।

2) जीवेश्वरयोः स्वरूपं निरूपयत।

3) एकमेवाद्वितीयम् इति विशेषणत्रयेण ब्रह्मणि के भेदाः कथं वारिताः भवन्ति?

4) मिथ्यात्वलक्षणं यथाग्रन्थं विवृणुत।

5) पञ्चकोशानां ब्रह्मणो विवेके प्रयोजनं किम्?

6) श्रुतिभिरीश्वरस्य जगत्स्रष्टृत्वमुपपादयत।

7) जीवसृष्टस्य द्वैतस्य हेयत्वं प्रतिपादयत?

**D) त्रिषु यथेच्छं द्वयमाधारीकृत्य टीका लेखनीया।** **5x2=10**

1) पञ्चदश्यां मङ्गलश्लोकः।

2) एकमेवाद्वितीयम्।

3) न वेदान्तात्प्रबलं मानमीक्षते।

**E) द्वयोः यथेच्छं एकं समाधत्त।** **10x1=10**

1) आत्मनः परमप्रेमास्पदत्वं ससन्दर्भं व्याख्यात।

2) बौद्धानामसद्वादं यथाग्रन्थं निराकुरुत।

***

RKMVU/Int MA/San/10-15/D 2013/SK-163

**SK-163 – वेदान्तपरिभाषा**

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

==========================================

**A) अधोनिर्दिष्टेषु पञ्चदशानामुत्तरं लिखत । 1x15=15**

1) वेदान्तपरिभाषाग्रन्थस्य को रचयिता?

2) अद्वैतवेदान्ते कति प्रमाणानि? कानि च तानि?

3) कर्मजन्यफलानाम् अनित्यत्वबोधिका श्रुतिः का?

4) वृत्तेः स्थायित्वं कियत्पर्यन्तं अङ्गीकृतम् ?

5) इन्द्रियजन्यज्ञानं न प्रत्यक्षमित्यत्र का युक्तयः परिभाषाकृता प्रदर्शिताः?

6) निरवयवस्य अन्तःकरणस्य परिणामात्मिका वृत्तिः कथम्?

7) तथाहि त्रिविधं चैतन्यम् - कानि च तानि?

8) प्रमात्रभेदो नाम कः?

9) किं नाम निर्विकल्पकप्रत्यक्षम्?

10) शब्दादप्यपरोक्षज्ञानं कदाङ्गीक्रियते?

11) को जीवसाक्षी?

12) मायायाः एकत्वे का श्रुतिः?

13) विवर्तो नाम कः ?

14) बाधो नाम कः ?

15) के इन्द्रिये विषयदेशं गत्वा स्वविषयं गृह्णीतः?

16) कुतः स्मृतेर्न संस्कारनाशकत्वम्?

17) स्वमते परार्थानुमानस्यावयवाः के ?

18) चित्सुखाचार्यसम्मतं मिथ्यात्वानुमानं किम्?

19) त्रिविधं सत्त्वं किम्?

20) किं तावदुपमानम्?

**B) अष्टसु पञ्च समाधत्त। 3x5=15**

1) वृत्तिर्नाम का ?

2) शाब्दज्ञानस्य प्रत्यक्षत्वं प्रतिपादयत।

3) संसर्गासङ्गिसम्यग्धीहेतुतेति श्लोकमुद्धृत्य व्याख्यात।

4) भ्रमभूतरजतस्य साक्षिणि अध्यस्तत्वे कथमहं रजतमिति प्रत्ययो न भवति?

5) ''तच्च प्रत्यक्षं पुनर्द्विविधं – जीवसाक्षी ईश्वरसाक्षी चेति'' – विवृणुत।

6) निवृत्तिबाधयोः कः भेदः ?

7) अनुमानद्वैविध्यमुपपादयत।

8) तच्चानुमानम् अन्वयिरूपमेकमेव – यथाशास्त्रमालोचयत।

**C) चतुर्षु द्वयोः लघुटिप्पणीं लिखत।** **5x2=10**

1) मनसः अनिन्द्रियत्वम्

2) धारावाहिकबुद्धिः

3) स्वप्नोपलब्धरथादीनां स्वरूपम्

4) व्याप्तिः

**D) यथेच्छमेकं समाधत्त।** **10x1=10**

1) प्रमात्वं सदलं विचारयत।

2) वेदान्तपरिभाषाग्रन्थस्य मङ्गलाचरणं व्याख्याय ग्रन्थस्यास्य अनुबन्धचतुष्टयं निरूपयत।

3) प्रत्यक्षज्ञानभेदान् यथाग्रन्थं प्रतिपादयत।

***

RKMVU/Int MA/San/12-14/D2013/SK-171

**SK-171 – अद्वैतसिद्धिः**

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

=========================================

**A) द्वादशसु दश प्रश्नान् वाक्येन वाक्याभ्यां वा उत्तरत। 1x10=10**

1) मङ्गलोक्तः विष्णुः कीदृशः।

2) द्वैतमिथ्यात्वं प्रथममुपपादनीयं किमर्थम्।

3) सत्त्वेन प्रतीत्यर्हम् इति दलस्यावश्यकता का।

4) पञ्चपादिकायां मिथ्यात्वलक्षणं किमुक्तम्।

5) किं नाम अर्थान्तरम्।

6) सिद्धान्तिमते असत्त्वं नाम किम्।

7) निषेधस्य निषेधे प्रतियोगिसत्त्वं कुत्र।

8) निषेधस्य तात्त्विकत्वे नाद्वैतहानिः, कुतः।

9) श्रुतेः अतात्त्विकनिषेधबोधकत्वे किं प्रामाण्यम्।

10) किं नाम प्रातिभासिकत्वम्।

11) असदेवेदमग्र आसीत् – इत्यत्र नञा किं प्रतिपाद्यते।

12) गोत्वाश्वत्वयोः गजे निषेधे निषेध्यतावच्छेदकं किम्।

**B) सप्तसु यथेच्छं पञ्चानां ग्रन्थपङ्क्तीनां सप्रसङ्गं व्याख्यानं लिखत। 3x5=15**

1) निश्चितौ हि वादं कुरुतः।

2) वियन्मिथ्या न वा, पृथ्वी मिथ्या न वा।

3) नापि तृतीयः,तस्य व्याघाताप्रयोजकत्वात्।

4) स्वाप्नार्थस्य स्वप्ननिषेधेन बाधदर्शनात्।

5) न च निषेधस्य निषेधे प्रतियोगिसत्त्वापत्तिरिति वाच्यम्।

6) अविद्यासहकार्येण नासीदस्ति भविष्यति।

7) प्रमाणसिद्धत्वञ्चाबाध्यत्वव्यापकमित्यन्यत्।

**C) पञ्चसु त्रयाणां लघुटिप्पणीं लिखत। 5x3=15**

1) पक्षता

2) द्वितीयमिथ्यात्वलक्षणे पूर्वपक्षः

3) विषमसत्ताकत्वम्

4) दृश्यत्वम्

5) वृत्तिव्याप्यत्वम्

**D) ग्रन्थोक्तदिशा द्वयोः एकस्य लघुप्रबन्धं कुरुत।** **10x1=10**

1) प्रथममिथ्यात्वं सपूर्वोत्तरपक्षं सयुक्ति संक्षिपत।

2) पञ्चमं मिथ्यात्वलक्षणं व्याख्यात।

***

RKMVU/Int MA/San/11-16/D2013/SK-205

## **SK**-205 – सिद्धान्तकौमुद्यां शब्दाधिकारः

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

==========================================

**A) यथेच्छं द्वादशसु दश प्रश्नान् समाधत्त। 1x10=10**

3) ङ्याप्प्रातिपदिकादिति सूत्रे ङ्याब्ग्रहणं कुतः।

4) एकवचनादिसंज्ञाविधायकं सूत्रं किम्।

5) भिस ऐसादेशः अन्त्यादेश उत सर्वादेशः।

6) तदन्तस्यापि सर्वनामसंज्ञा इत्यत्र ज्ञापकं सूत्रं किम्।

7) उभशब्दस्य सर्वादिगणे पाठः किमर्थः।

8) अल्लोपोऽनः इत्यस्यार्थं लिखत।

9) अस्त्रियां घेः परस्याङः नाभावविधायकं सूत्रं किम्।

10) ङसिङसोश्च इति सूत्रेण किं विधीयते।

11) परमः सखा यस्य इति विग्रहे किं रूपम्।

12) सर्वासामित्यत्र सुडागमः कथम्।

13) व्रश्चभ्रश्च ... इति सूत्रं पूरयत।

14) ऋन्नेभ्यो ङीप् इत्यस्यार्थः कः।

**B) सप्तसु पञ्च समाधत्त। 3x5=15**

1) सर्वे इति रूपं साधयत।

2) विश्वपः इति रूपं साधयत।

3) हे रमे इति रूपं साधयत।

4) मो नो धातोः इति सूत्रं व्याख्यात।

5) सर्वनाम्नः स्मै इति सूत्रं व्याख्यात।

6) औङ आपः इति सूत्रं व्याख्यात।

7) दिव औत् इति सूत्रं व्याख्यात।

**C) पञ्चसु त्रयं समाधत्त। 5x3=15**

1) अनड्वान् इति रूपं साधयत।

2) दधनि इति रूपं साधयत।

3) बहुवचने झल्येत् इति सदलकृत्यं सूत्रं व्याख्यात।

4) गुणनाभावोर्त्वनुड्भिः परत्वात्पुंसि बाध्यते।

क्लीबे नुमा च स्त्रीशब्दस्येयङित्यवधार्यताम्।। इति कारिकां व्याख्यात।

5) कथं तर्हि हा पितः क्वासि हे सुभ्रु इति भट्टिः इति ससन्दर्भं समाधत्त।

**D) द्वयोः अभीष्टमेकं समाधत्त।** **10x1=10**

1) जराया जरसन्यतरस्याम् इति सूत्रं व्याख्यात।

2) कृत्तद्धितसमासाश्च इति सूत्रं व्याख्यात।

***

RKMVU/Int MA/San/10-15 & 09-14/D2013/SK-213

## SK-213 - सिद्धान्तकौमुद्यां समासप्रकरणम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

==========================================

**A**) **विंशतिं समाधत्त** **1x20=20**

1) तत्पुरुषः इति सूत्रस्याधिकारः कियान्?
2) अन्नं बुभुक्षुः इत्यत्र कथं समासः?
3) किं नामाधिकार्थवचनम्?
4) ईश्वराधीनः इत्यत्र को विग्रहः केन च समासः?
5) पोटायुवति इत्यादि सूत्रं पुरयत।
6) एकवीरः इत्यत्र वीरैकः इति कथं न?
7) घन इव श्यामो इत्यत्र इव पदं किमर्थं प्रयुज्यते?
8) नपुंसकमित्यस्य विग्रहं विलिख्य केन निपातनाद्भवतीति प्रदर्शयत।
9) वृक्षं प्रति इत्यत्र कथं न समासः?
10) व्याघ्री इति कथं सिध्यति?
11) त्रिपदे बहुव्रीहौ प्रथमं न पुंवत् कुतः?
12) शतधन्वा इत्यस्यार्थः कः?
13) चार्थे द्वन्द्व इत्यत्र च इत्यस्य कति अर्थाः?
14) क्षुद्रजन्तवः के?
15) पितापुत्रौ इति कथम्?
16) पञ्चवृत्तयः के?
17) विग्रहः कतिविधः?
18) बन्धुनि बहुव्रीहौ इत्यस्मिन् सूत्रे क्लीबनिर्देशः किमर्थम्?
19) कद्वदः इत्यस्य अर्थः कः?
20) शरावती इत्यत्र दीर्घः केन सूत्रेण?
21) क्षीरपाणा इत्यस्य विग्रहः कथम्?

22) रम्ययूना इत्यादौ णत्वं कथं न?

**B) चत्वारि साधयत** **5x4=20**

1) पौर्वशालः इति रूपं साधयत।

2) नञ्समासविषये लघुनिबन्धं लिखत।

3) बहुव्रीहौ पूर्वनिपातनियमान् विवृणुत।

4) त्यदादीनि सर्वैर्नित्यमित्यादि सूत्रं व्याख्यात।

5) भवेद्वर्णागमाद्धंस इत्यादिकारिकां व्याख्यात।

**C) एकस्य उत्तरं देयम्** **10x1=10**

1) गतिसंज्ञाविषये निबन्धमेकं लिखत।

2) चार्थे द्वन्द्व इति सूत्रं व्याख्यात।

***

RKMVU/Int MA/San/11-16/D2013/SK-225

## **SK**-225 - सिद्धान्तकौमुद्यामदादितश्चुरादिपर्यन्तम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

===========================================

**A**) **विंशतिं समाधत्त** **1x**20=20

1) शपो लुग्विधायकं सूत्रं किम्?

2) आदत् इत्यत्राडागमः केन सूत्रेण? सूत्रस्यार्थः कः?

3) हन्धातोः लोटि सिपि किं रूपम्?

4) उपचयो नाम किम्?

5) शेते इत्यत्र केन सूत्रेण गुणः भवति?

6) स्तः इत्यत्र अकारलोपः कथम्?

7) पिपर्ति इत्यत्र पॄ-धातोः ऋकारस्य इत्त्वं कथम्?

8) हेयात् इत्यत्र एत्त्वं कथम्?

9) दिवु धातुः केषु अर्थेषु विद्यते?

10) को नाम अभिषवः?

11) राध्नोः इत्यस्य लकारपुरुषवचनानि लेख्यनि?

12) विज इट् इत्यस्य अर्थं लिखत।

13) शे मुचादीनाम् इत्यनेन किं भवति?

14) श्नान्नलोपः इत्यस्य सूत्रस्यार्थं लिखत।

15) तन्वः तनुव इति रूपद्वयं कुतः?

16) संस्करोति इत्यत्र सुडागमः कदा भवति?

17) निरः कुषः इत्यनेन शास्त्रेण किं विधीयते?

18) सत्यापपाशरूप इत्यादिसूत्रं पूरयत।

19) उर्ऋत् इति सूत्रस्य अर्थं लिखत।

20) ई च गणः इति सूत्रस्यार्थः कः?१

21) अवस्कन्दनं नाम किम्?

22) इररारामपवादः कः?

**B) चत्वारि रूपाणि साधयत** **5x4=20**

1) जहि

2) अरोदीत्

3) वव्रश्च

4) तेने

5) क्रीणन्ति

**C)एकस्य उत्तरं देयम्** **10x1=10**

1) गुणो वृद्धिः इति कारिकां व्याख्यात।

2) दधस्तथोश्च इति सूत्रं व्याख्यात।

***

RKMVU/Int MA/San/10-15/D2013/SK-227

**SK-227 - सिद्धान्तकौमुद्यां पूर्वोत्तरकृदन्तप्रकरणे उणादिवर्जे**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

==========================================

**A) पञ्चदश समाधत्त** **1x15=15**

1) अम्बाम्बगोभूमि... इति सूत्रं पुरयत।

2) स्तम्बेरमः इत्यत्र ङेरलुक् कथम्?

3) लवणः इत्यत्र कः प्रत्ययः केन सूत्रेण?

4) सोमयाजी इत्यस्यार्थं लिखत।

5) सुगः इत्यस्यार्थं लिथत।

6) धनुष्करः इत्यत्र कथं षकारः?

7) पूङः क्त्वा च इत्यत्र क्त्वाग्रहणं किमर्थम्।

8) जग्धः इत्यत्र कः धातुः, तस्य जग्ध्यादेशः केन सूत्रेण।

9) निष्ठासंज्ञा विधायकं सूत्रं लिखत?

10) निष्कुषित इत्यत्र इत्वं केन सूत्रेण?

11) केषु द्योत्येषु कर्तरि चानश् भवतीति ससूत्रोदाहरणं लिखत।

12) आने मुक् इत्यत्र ऌडित्यनुवर्तमाने पुनर्लड्ग्रहणं किमर्थम्?

13) घः कर्मणि ष्ट्रन् इत्यत्र षकारः कुतः उपादीयते?

14) रागः इत्यत्र रञ्जेर्नलोपः कथम्?

15) अवनाय उन्नाय इत्यनयोः कोऽर्थः?

16) परिभवः इत्यस्यार्थः कः?

17) समजः इत्यस्यार्थः कः?

**B) पञ्च साधयत** **3x5=15**

1) ब्रह्मभ्रूणवृत्रेषु क्विप् इति सूत्रं व्याख्यात।

2) अवदत्तं विदत्तं चेति कारिकां व्याख्यात।

3) उणादयः कुतो भवन्ति?

4) ण्यासश्रन्थो युच् इति सूत्रं व्याख्यात।

5) पक्त्रिमम् इति साधयत।

6) ईषद्दुःसुषु इत्यादिसूत्रं व्याख्यात।

**C) द्वयोरुत्तरं देयम्** **5x2=10**

1) सुपि स्थ इति सूत्रं व्याख्यात।

2) क्वसुकानचोर्विवरणं क्रियताम्।

3) क्त्वाप्रत्ययविधानं वर्णयत।

**D) एकस्य उत्तरं देयम्** **10x1=10**

1) खश्प्रत्ययविधायकसूत्राणां वर्णनं कुरुत।

2) निष्ठातस्य नकारविधानं प्रतिपादयत।

***

RKMVU/Int MA/San/13-14/D2013/SK-236

# SK-236 – लघुसिद्धान्तकौमुद्यां संज्ञासन्धिसमासप्रकरणानि

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

==========================================

**A) अष्टादशसु पञ्चदश समाधेयाः।** **1x15=15**

1) पतञ्जलिः कं व्याकरणग्रन्थं रचितवान्।

2) अक्षरसमाम्नाये अनुबन्धभिन्नः कः वर्णः द्विः अस्ति।

3) उपदेशो नाम कः।

4) ग्रहणकशास्त्रं किम्।

5) संहितासंज्ञाविधायकं सूत्रं किम्।

6) अपवादलक्षणं किम्।

7) वृद्धिः इति कस्य संज्ञा।

8) रामात् इतीह टि किम्।

9) सत् चित् इत्यत्र सन्धौ किं रूपम्।

10) विद्वान् लिखति इतीह सन्धौ किं रूपम्।

11) डः सि धुट् इत्यस्य उदाहरत।

12) ङमो ह्रस्वादचि ङमुण्नित्यमिति सूत्रार्थं लिखत।

13) शिवस् अर्चः इत्यत्र सन्धौ किं रूपम्।

14) प्रायेण अन्यपदार्थप्रधानसमासः कः।

15) अव्ययं विभक्ति... इति सूत्रं पूरयत।

16) बहुव्रीहौ पूर्वनिपातनिर्णयः केन सूत्रेण भवति।

17) लोम्नः अप् कदा भवति।

18) केषां द्वन्द्व एकवद् भवति।

**B) सप्तसु त्रीन् निर्देशानुसारं समाधत्त।** **3x5=15**

1) सूत्रलक्षणं किम्। श्लोकोऽपि लेख्यः।

2) प्रेजते इति रूपं साधयत।

3) ईदूदेद् द्विवचनं प्रगृह्यम् इति सूत्रस्य सामान्यम् अर्थं विव्रिय उदाहरणानि प्रदत्त।

4) उत्थानम् इति रूपं साधयत।

5) नॄन् पाहि इतीह सन्धौ पञ्च रूपाणि लिखत।

6) व्याकरणे वृत्तयः कति। काश्च।

7) अनेकमन्यपदार्थे इति सूत्रं व्याख्यात।

**C) चतुर्षु द्वौ समाधत्त।** **5x2=10**

1) मद्ध्वरिः इति रूपं साधयत।

2) प्रथमानिर्दिष्टं समास उपसर्जनम् इति सूत्रं व्याख्यात।

3) नखभिन्नः भिन्ननखः इति द्वयोः विग्रहौ समासनामनी विधायकसूत्रे च लिखत।

4) द्वन्द्वसमासे पूरपरनिपातविषये लघुटिप्पणीं लिखत।

**D) द्वयोः एकः प्रश्नः समाधेयः।** **1x10=10**

1) तपरस्तत्कालस्य इति सूत्रं व्याख्यात।

2) पूर्वत्रासिद्धमिति सूत्रं व्याख्यात।

***

RKMVU/Int MA/San/13–14/D2013/SK–236 Supplementary

## SK–236 – लघुसिद्धान्तकौमुद्यां संज्ञासन्धिसमासप्रकरणानि

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

==========================================

**A)अष्टादशसु पञ्चदश समाधेयाः।** **1x15=15**

1) वररुचिः व्याकरणे किं रचितवान्।

2) का परिभाषा।

3) प्रत्याहारनिर्माणं केन सूत्रेण भवति।

4) विवृतप्रयत्नः केषाम्।

5) को नित्यो विधिः।

6) गुण इति कस्य संज्ञा।

7) रामकृष्णावमू आसाते इतीह रामकृष्णौ इति ग्रहणं किमर्थम्।

8) एतन्मुरारिः इतीह सन्धिः केन सूत्रेण।

9) नश्च इत्यस्य उदाहरत।

10) विसर्जनीयस्य सः इति सूत्रार्थं लिखत।

11) देवास् इह इत्यत्र सन्धौ किं रूपद्वयम्।

12) कः विग्रहः।

13) पञ्चगङ्गम् इति समासः केन सूत्रेण।

14) राजपुरुषः इत्यत्र केन सूत्रेण समासः।

15) विशेषणं विशेष्येण बहुलमिति सूत्रस्यार्थं लिखत।

16) बहुव्रीहिसंज्ञाविधायकं सूत्रं किम्।

17) काकुदस्य लोपः कदा।

18) हरिहरौ इत्यत्र हरेः पर्वनिपातः कुतः।

**B)सप्तसु त्रीन् निर्देशानुसारं समाधत्त।** **3x5=15**

1) पञ्च आभ्यन्तरप्रयत्नाः के।

2) वृद्धिरेचि इत्यस्य एचः त्रयाणां वर्णानाम् एकैकम् उदाहरणं लिखत।

3) निपातः एकाजनाङ् इत्यस्य त्रीणि उदाहणानि सकारणं लिखत।

4) वाग्घरिः, कम्बलार्णम् इति द्वयोरेकं रूपं साधयत।

5) त्रीन् यर्थार्थान् लिखित्वा उदाहरणानि सार्थानि लिखत।

6) तद्धितार्थोत्तरपदसमाहारे च इति त्रयाणामपि उदाहरत।

7) कुगतिप्रादयः इत्यस्य प्रत्येकमुदाहरणानि दीयन्ताम्।

**C)चतुर्षु द्वौ समाधत्त। 5x2=10**

1) 'अ' कारस्य सर्वभेदान् चित्रमुखेन प्रतिपादयत।

2) सहरि इति रूपं साधयत।

3) तत्पुरुषः समानाधिकरणः कर्मधारयः इति सूत्रं व्याख्यात।

4) प्रादयो गताद्यर्थे इति पञ्च वार्तिकानि लिखित्वा प्रत्येकमुदाहरणानि लिखत।

**D)द्वयोः एकः प्रश्नः समाधेयः। 1x10=10**

1) तुल्यास्यप्रयत्नं सवर्णम् इति सूत्रं व्याख्यात।

2) इको यणचि इति सूत्रं व्याख्यात।

***

RKMVU/Int MA/San/12-17/D2013/SK-239

## **SK-239 - लघुसिद्धान्तकौमुद्यां कृत्तद्धितप्रकरणे**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

========================================

**A) द्वादशप्रश्नेषु दशप्रश्नाः समाधेयाः।** **10x1=10**

1) कृत्प्रत्ययाः कस्मिन्नर्थे।
2) ईद्यति इत्यस्य कः अर्थः।
3) कृधातोः हेत्वर्थे टप्रत्ययस्योदाहरणं किम्।
4) कस्मिन्नुपपदे जन्धातोः डप्रत्ययः।
5) स्वप्नः इत्यत्र कः प्रत्ययः।
6) हितम्। अत्र धातुः कः।
7) सत्संज्ञा कयोः प्रत्ययः।
8) क्रियार्थक्रियोपपदे कौ प्रत्ययौ।
9) ईहा इत्यत्र अप्रत्ययः केन सूत्रेण।
10) रामः इत्यत्र केन सूत्रेण घञ्।
11) न क्त्वा सेट् इति सूत्रेण किं विधीयते।
12) बहिस् शब्दात् कौ प्रत्ययौ।

**B) सप्तसु पञ्च रूपाणि साधयत।** **5x3=15**

1) देयम्
2) नन्दनः
3) भिन्नः
4) जल्पाकः
5) करः
6) प्रकृत्य
7) औत्सः

**C) पञ्चसु त्रयाणां समाधानं कुरुत।** **3x5=15**

1) कृत्यल्युटो बहुलम्।

2) संयोगादेरातो धातोर्यण्वतः।

3) गुरोश्च हलः।

4) समानकर्तृकयोः पूर्वकाले।

5) दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः।

**D) द्वयोः एकस्य समाधानं कुरुत।** **1x10=10**

1) लटः शतृशानचावप्रथमासमानाधिकरणे।

2) स्त्रियां विहिताः प्रत्ययाः के – ससूत्रं वर्णयत।

***

RKMVU/Int MA/San/10-15/D2013/SK-241

## **SK-241 – महाभाष्ये 2-4 आह्निकानि**

कालावधिः – होराद्वयम् | पूर्णाङ्काः – 50

=========================================

**A) त्रयोदशसु केषाञ्चिद् दशानां प्रश्ननानाम् उत्तरं देयम्।** **1x10=10**

1) भाष्यलक्षणं किम्।
2) प्रत्याहारसंज्ञा अन्वर्था न वा।
3) ऋकारभेदाः कति।
4) अयोगवाहाः के।
5) तृतीयाह्निकस्य प्रथमं सूत्रं किं वर्तते।
6) वृद्धिरादेच् इत्यत्र कुत्वं कस्मान्न भवति।
7) तद्भावितपदार्थः कः।
8) व्याकरणशास्त्रं किं शास्तीति भाष्यकारः।
9) आचार्यः कथं सूत्राणि प्रणयति स्म।
10) कयोर्विशेष्यविशेषणभावः इति भाष्यकारः।
11) अनाकृतिः संज्ञा इत्यस्य कोर्थः।
12) कानि शास्त्राणि प्रथन्ते।
13) न धातुलोप आर्धधातुके इत्यत्र धातुलोप इति समासं सविग्रहं लिखत।

**B) सप्तसु पञ्चानां प्रश्नानां समाधानं कुरुत।** **3x5=15**

1) वृत्तिसमवायार्थ उपदेशः इति सक्षेपेण लिखत।
2) अर्थवन्तो वर्णाः इति भाष्योक्तरीत्या संक्षेपेण प्रतिपाद्यताम्।
3) शर्षु जश्भावषत्वे इति प्रतिपादयत।
4) वृद्धिरादैच् इत्यत्र कुत्वं कुतो न।
5) अकारस्य विवृतोपदेशः किमर्थ इति प्रतिपादयत।
6) अनुवृत्तिः कतिविधा भवति इति सम्पाद्य इको गुणवृद्धी इत्यत्र गुणवृद्धी इति पदं कुतः समयातीति सम्पादयत।

7) षष्ठ्याः स्थानेयोगत्वादिग्निवृत्तिः इति वार्तिकस्य हार्दं सम्पादयत।

**C) पञ्चसु त्रीन् प्रश्नान् समाधत्त।** **5x3=15**

1) हल् इत्यत्र हकारस्य प्रयोजनं किम्। व्याख्यां कुरुत।

2) लण्-मध्ये णकारानुबन्धस्य किं फलमिति प्रतिपादयत।

3) अन्तःस्थवर्णानाम् अण्-सु उपदेशप्रयोजनं प्रतिपादयत।

4) वर्णसमाम्नाये लृकारोपदेशप्रयोजनं लिखत।

5) संज्ञाधिकारे दोषोऽस्ति न वा विचार्यताम्।

**D) द्वयोरेकं समाधत्त।** **10x1=10**

1) हयवरट् इति सूत्रं भाष्योक्तदिशा व्याख्यात।

2) इको गुणवृद्धी इत्यत्र तच्छेषतदपवादपक्षौ स्थापयत।

***

RKMVU/Int MA/San/09-14/D2013/SK-244

**SK-244 - महाभाष्ये अष्टम-नवम-समर्थाह्निकानि**

कालावधिः - होराद्वयम्  पूर्णाङ्काः - 50

==========================================

**A) द्वादशप्रश्नेषु दशप्रश्नाः समाधेयाः  10x1=10**

1) आदेशिन्यल्विधिप्रतिषेधे के दोषाः ?

2) अपवादे उत्सर्गकृतं न भवतीत्यत्र किं ज्ञापकम् ?

3) संयोगस्य कुतो न दोषः ?

4) द्विर्वचनेऽचीत्यत्र रूपातिदेशस्य किं ज्ञापकम् ?

5) कथमेकेन द्विर्वचनशब्देन उभयार्थसिद्धिः ?

6) लोपसंज्ञायामितरेतराश्रयः कथं वारितः ?

7) लुक्श्लुलुपः सर्वादिशाः भवन्तीत्यत्र किं ज्ञापकम् ?

8) भसंज्ञा प्रत्ययलक्षणेन न भवतीत्यत्र ज्ञापकं किम् ?

9) समर्थसूत्रे पदविधिः इत्यत्र का षष्ठी ?

10) समर्थशब्दस्य एकार्थीभावसामर्थ्ये कथं विग्रहः ?

11) द्वयोर्द्वयोः समासे द्वन्द्वे कुत्र दोषः ?

12) संख्ययाव्ययासन्नेति सूत्राभावे अधिकषष्टिवर्षः इत्यत्र कः विग्रहः ?

**B) सप्तसु प्रश्नानामुत्तरं लिखत  5x3=15**

1) आदेश्यादेश इति चेत्सुप्तिङ्कृदतिदिष्टेषूपसङ्ख्यानम्।

2) क्वौ लुप्तं न स्थानिवदिति वार्तिकं वर्णयत।

3) प्रयोजनं क्सलोपः क्सलोपे इति वार्तिकं वर्णयत।

4) अदर्शनं लोप इति सूत्रे प्रत्ययलक्षणप्रतिषेधं वर्णयत।

5) सतो निमित्ताभावात्पदसंज्ञाभाव इति वार्तिकं प्रतिपादयत।

6) आख्यातं सविशेषणम् इति वार्तिकं व्याख्यात।

7) व्यपेक्षासामर्थे अधिकारे च के दोषाः ।

**C) पञ्चसु त्रयाणां समाधानं कुरुत  3x5=15**

1) स्थानिवद्भावे शब्दनित्यत्वानुपपत्तिं परिहरत।

2) अचः परस्मिन्नित्यत्र भावाभावातिदेशः इति प्रतिपादयत।

3) पूर्वत्रासिद्धे न स्थानिवदिति वार्तिकप्रयोजनं वर्णयत।

4) प्रत्ययलोप इति सूत्रे प्रत्ययग्रहणप्रयोजनं वर्णयत।

5) समर्थसूत्रोक्तवाक्यलक्षणम् ।

**D) द्वयोः एकस्य समाधानं कुरुत** **1x10=10**

1) स्थानिवत्सूत्रं सदलप्रयोजनं प्रतिपाद्य भाष्यदिशा निराकुरुत।

2) प्रत्ययलोप इति सूत्रं व्याख्यात।

***

RKMVU/Int MA/San/09-14/D2013/SK-257

## **SK**-257- परिभाषेन्दुशेखरे 51-131 परिभाषाः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

===========================================

**A**) **यथेच्छं द्वादशसु दश प्रश्नान् समाधत्त।** **1x10=10**

1) नाजानन्तर्यपरिभाषायाः अर्थः कः।

2) वार्णादाङ्गं बलीयः इति परिभाषाया ज्ञापकं किम्।

3) पूर्वं ह्यपवादा अभिनिविशन्ते इत्यत्राभिनिविशन्ते इत्यस्यार्थः कः।

4) भृशादिभ्यो भुव्यच्वेः इत्यादिना कः प्रत्ययो विधीयते।

5) ययतोश्चातदर्थे इत्यस्यार्थः कः।

6) वामदेवाड्ड्यौ इत्यनेन के परिभाषे ज्ञाप्येते।

7) चुरा शीलमस्य सा चौरी इत्यत्र तद्धितप्रत्ययः कः।

8) आगमशास्त्रस्यानित्यत्वात् किं रूपं सिद्ध्यति।

9) सामान्यातिदेशे कस्यानतिदेशः।

10) प्रत्ययाप्रत्यययोः प्रत्ययस्य ग्रहणमिति न्यायः कुत्र न प्रवर्तते।

11) सामान्यातिदेशे विशेषानतिदेशः इत्यस्याः परिभाषायाः किं बीजम्।

12) मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् इत्यस्योदाहरणं लिखत।

**B**) **अभीष्टान् सप्तसु पञ्च प्रश्नान् समाधत्त।** **3x5=15**

1) अङ्गवृत्तपरिभाषायाः अर्थं विलिख्य अनित्यत्वं साधयत।

2) सन्नियोगशिष्टपरिभाषाया अवतरणिकाग्रन्थस्य समन्वयं कुरुत।

3) सन्निपातपरिभाषाया अनित्यत्वे प्रदर्शितेषु बहुषु उदाहरणेषु अन्यतमस्य समन्वयं कुरुत।

4) चानुकृष्टं नोत्तरत्र इत्यस्या अनित्यत्वम् उपपादयत।

5) साम्प्रतिकाभावे भूतपूर्वगतिरिति व्याख्यात।

6) अर्धं नपुंसकमिति सूत्रेण का परिभाषा ज्ञाप्यत इति उपपादयत।

7) लादेशेषु वासरूपविधिर्नास्तीत्यस्य ज्ञापकत्वं कथयत।

**C**) **अभीष्टान् पञ्चसु त्रीन् प्रश्नान् विशदयत।** **5x3=15**

1) नाजानन्तर्यपरिभाषायां णत्वग्रहणमपि ज्ञापकमिति यत्तुकारवचनमुपापदयत।

2) प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषा कुत्र न प्रवर्तत इति परिगणनं कुरुत।

3) सन्निपातलक्षणपरिभाषाया विशेष्यविशेषणसन्निपातस्यापि ग्रहणमित्यस्योदाहरणं प्रदर्श्य समन्वयं कुरुत।

4) लुग्विकरणालुग्विकरणयोः इत्यस्या ध्वननप्रकारं स्पष्टीकुरुत।

5) गामादाग्रहणेष्वविशेष इति व्याख्यात

**D) द्वयोः अभीष्टमेकं प्रश्नोत्तरं प्रपञ्चयत।** **10x1=10**

1) गतिकारकोपपदानामिति परिभाषां व्याख्यात।

2) वार्णपरिभाषायाम् अभ्यासग्रहणं ज्ञापकमिति मतमुपपादयत।

***

RKMVU/Int MA/San/10-15/D2013/SK-265

# **SK**-265 - लघुशब्देन्दुशेखरे संज्ञापरिभाषम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

=========================================

**A) द्वादशप्रश्नेषु दशप्रश्नाः समाधेयाः-** **10x1=10**

1) अइउण् इत्यत्र कुतो न सन्धिः ?

2) नागेशमते उरणित्यत्र कथं लकारसिद्धिः ?

3) नागेशमते लक्ष्यैकचक्षुष्कविषये का परिभाषा प्रवर्तते ?

4) दीक्षितमते उपदेशशब्दार्थः कः?

5) ऊकाल इत्यत्र ऊ इत्यनेन किं लक्ष्यते ?

6) प्रशब्दाभावे कुत्र दोषः ?

7) विधेयविभक्तिः का ?

8) स्थानेयोगेत्यस्य विग्रहः कः ?

9) तस्मिन्निति परिभाषायाः लिङ्गं किम् ?

10) तस्मादित्यनेन किं नियम्यते ?

11) आदेः परस्येत्यस्य अनेकाल्त्वाद्बाधः कुत्र ?

12) नित्यसूत्रस्य बलवत्वे किं बीजम् ?

**B) सप्तसु पञ्चानामुत्तरं लिखत-** **5x3=15**

1) उपजीव्यविरोधात्सन्धिर्न। विवृणुत।

2) नागेशमते आदिरन्त्येनेत्यत्र कथं स्वस्येत्यर्थसिद्धिः ?

3) हलन्त्यसूत्रे भावघञन्तानुवृत्तौ कः दोषः ?

4) इको गुणवृद्धी इत्यत्र गुणवृद्धिशब्दाभ्यामिति कथम् ?

5) यत्रानेकविधपरिभाषा कथं सिद्धा ?

6) औपश्लेषिकसप्तम्याश्रयणात् कथं निर्दिष्टपदं व्यर्थं भवति ?

7) नानेकालिति कुतः नोक्तम् ?

**C) पञ्चसु त्रयाणां समाधानं कुरुत- 3x5=15**

1) योगविभागेनान्योन्याश्रयपरिहारः।

2) अनेकान्ताः अनुबन्धाः।

3) अनुनासिक इत्यादि निर्देशदिति शेखरदिशा व्याख्यात।

4) तुल्यास्यप्रयत्नमिति शब्दस्यार्थः कः।

5) आदेः परस्य।

**D) द्वयोः एकस्य समाधानं कुरुत- 1x10=10**

1) षष्ठी स्थानेयोगा।

2) तस्मिन्निति निर्दिष्टे पूर्वस्य।

***

RKMVU/Int MA/San/09-14/D2013/SK-281

# **SK**-281 - वाक्यपदीये ब्रह्मकाण्डम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

==========================================

**A) द्वादशसु प्रश्नेषु दश समाधेयाः।** **10x1=10**

1) तस्य ब्रह्मणः आसन्नं किम् ?

2) अर्थस्य भेदद्वयं किम् ?

3) उपादानशब्दस्य कति भेदाः ?

4) ज्ञाने कयोः रूपं दृश्यते ?

5) कः नियतं कार्यभाक् न भवति ?

6) ह्रस्वदीर्घादयः कस्य ध्वनेः भेदः ?

7) कार्यपक्षे स्फोटः कः ?

8) आन्तरः ज्ञाता कथं स्थितः ?

9) वर्णानभिव्यज्य प्राणः कुत्र लीयते ?

10) ज्ञानं कथं भासते ?

11) कः अपभ्रंशः ?

12) केषां साधुरवाचकाः ?

**B) सप्तसु पञ्च श्लोकान् व्याख्यात।** **5x3=15**

1) अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।

2) प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभिः।
एकोऽप्यनेकवर्त्मेव समाम्नातः पृथक् पृथक्।।

3) नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः।
सूत्राणामनुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः।।

4) अरणिस्थं यथा ज्योतिः प्रकाशान्तरकारणम्।
तद्वच्छब्दोपि बुद्धिस्थः श्रुतीनां कारणं पृथक्।।

5) स्वं रूपमिति कैश्चित्तु व्यक्तिः संज्ञोपदिश्यते।

जातेः कार्याणि संसृष्टा जातिस्तु प्रतिपद्यते।।

6) शब्दस्य परिणामोयमित्याम्नायविदो विदुः।

छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत।।

7) अम्बाम्बेति यथा बालः शिक्षमाणः प्रभासते।

अव्यक्तं तद्विदां तेन व्यक्ते भवति निश्चयः।।

**C) पञ्चसु त्रयाणां निबन्धं लिखत।** **3x5=15**

1) अभ्यासदृष्टयोः प्रामाण्यम्।

2) शब्दस्य ग्राह्यग्राहकत्वे।

3) प्राकृतवैकृतध्वनिभेदः।

4) अणोः शब्दत्वेन परिणामः।

5) वेदाविरोधी तर्कः।

**D) द्वयोः एकस्मिन् निबन्धं लिखत।** **1x10=10**

1) अष्टौ पदार्थाः।

2) अपभ्रंशविचारः।

***

RKMVU/Int MA/San/09-14/D2013/SK-284

## SK-284 - वैयाकरणसिद्धान्तलघुमञ्जूषायां तात्पर्यनिरूपणान्तो भागः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

==========================================

**A) दश समाधत्त** **1x10=10**

1) वाक्यस्फोटस्य मुख्यत्वं कुतः?

2) साधुत्वं कीदृशम्?

3) शाब्दबोधे कार्यकारणभावं लिखत।

4) नानार्थकत्वं नाम किम्?

5) ज्ञापकत्वं नाम किम्?

6) गोपी इत्यस्य लाक्षणिकः अर्थः कः?

7) कार्यं कारणात्मकमुत कारणं कार्यात्मकम्?

8) सत्यत्वं नाम किम्?

9) वस्तुतः अष्टसु वृत्त्याश्रयः स्फोटः कः?

10) श्रोत्रग्राह्या वाक् का?

11) अयमर्थः साकाङ्क्षः इत्यत्र साकाङ्क्षत्वं केन सम्बन्धेन?

12) आसत्तिः शाब्दबोधे न कारणम्। कुतः?

**B) पञ्च साधयत 6x5=30**

1) शब्दार्थयोस्तादात्म्यं निरूपयत।

2) द्विरेफपदे लक्षणा अस्ति न वेति प्रतिपादयत।

3) अविद्यास्वरूपं व्यवस्थापयत।

4) प्रणवादेव वेदादीनां सृष्टिर्भवतीति प्रतिपादयत।

5) अद्वैतनये जातिलक्षणं प्रतिपाद्यताम्।

6) आकाङ्क्षालक्षणं प्रतिपादयत।

**C) एकं साधयत** **10x1=10**

1) अपभ्रंशेषु शक्तिरस्ति न वेति विचारयत।

2) स्फोटस्वरूपं वर्णयत।

***

# **SK**-305 - वेदवेदाङ्गादि

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

===========================================

**A) द्वादशसु दश एकेन वाक्येन समाधेयाः। 1x10=10**

1) वचनम् इन्द्रियनित्यम् इति कस्य मतम्।
2) निरुक्तसम्प्रदाये कर्मशब्दस्य कोऽर्थः।
3) बिल्मशब्दस्य कोऽर्थः।
4) उपमार्थे कति निपाताः। के ते।
5) पुरुषसुक्ते साध्यशब्दः किमर्थकः।
6) पशुषु प्रकारद्वयं किम्।
7) साशनानशने इत्यत्र विग्रहः कथम्।
8) आपो वा इदमग्रे सलिलमासीत् इत्यादिश्रुतिः किंविषया।
9) अद्धाशब्दस्य कः अर्थः।
10) स जनास इन्द्रः इति कस्य वचनम्।
11) शम्बरः कः।
12) दासो वर्णः कः।

**B) सप्तसु पञ्च समाधेयाः। 3x5=15**

1) हविर्भिरेके स्वरितः सचन्ते सुवन्त एके सवनेषु सोमान्।
   शचीर्मदन्त उत दक्षिणाभिर्नोज्जिह्मायन्त्यो नरकं पताम।। इत्यस्य भावार्थं प्रकाशयत।
2) ऋचः सामानि जज्ञिरे इत्यादिमन्त्रं विवृणुत।
3) इन्द्रः किमिति परिदेवयाञ्चक्रे।
4) आनीदवातं इत्यत्र असाङ्गत्यं सङ्गमयत।
5) सर्वज्ञाः देवाः अपि सृष्टिमूलकारणं न विदुः इत्यत्र मन्त्रतद्भाष्यस्वारस्येन उपपादयत।
6) इद्रेण शम्बरस्य मारणं कथं कृतम्।
7) ऋषभः-तुविष्मान्-मनस्वान्-प्रतिमानं-सोमपा-वज्रबाहुः इत्येतेषाम् इन्द्रविशेषणानां

भाष्योक्तानर्थान् लिखत।

**C) पञ्चसु यथेच्छं त्रयः समाधेयाः।** **5x3=15**

1) निघण्टुपदार्थं विविच्य निरुक्तशास्त्रस्य महिमानं वर्णयत।

2) याज्ञिकाः कथंकारं सृष्टिं पर्यकल्पयन्।

3) को अद्धा वेद इत्यादिमन्त्रं विवृणुत।

4) यो जात एव प्रथमो मनस्वान्देवो देवान् क्रतुना पर्यभूषत्। यस्य शुष्माद्रोदसी अभ्यसेता नृम्णस्य मह्ना स जनास इन्द्रः।। इतीमं मन्त्रं भाष्योक्तरीत्या विवृणुति।

5) यो रध्रस्य चोदिता यः कुशस्य यो ब्रह्मणो नाधमानस्य कीरेः। युक्तग्राव्णो योऽविता सुशिप्रः सुतसोमस्य स जनास इन्द्रः।। इतीमं मन्त्रं भाष्यानुसारेण विशदयत।

**D) द्वयोः एकं यथेच्छं समाधत्त।** **10x1=10**

